# नारदभक्तिसूत्रम्

edited by Toke Lindegaard Knudsen

Last revised: March 31, 2001

The editions used as the basis of the following text are:

C Swami Chinmayananda: *Narada Bhakti Sutra*. Bombay, India: Central Chinmaya Mission Trust, 1990 reprint.

G Tridandi Bhakti Prajnan Yati: *Sri Hari Bhakti Sudhodaya & Sri Nārada Bhakti Sutras*. Madras, India: Sri Gaudiya Math, 1989.

H Electronic edition by Sundar Hattangadi available at
`http://sanskrit.bhaarat.com/The_Document_Project/doc_z_misc_major_works/doc_z_misc_major_works.html`
The edition used was last updated on February 9, 1998.

I A. C. Bhaktivedanta Prabhupāda and his disciples: *Nārada-Bhakti-Sūtra*. Bombay, India: The Bhaktivedanta Book Trust, not dated (but the remark "Correct as of July 1992" is made in connection with a listing of ISKCON centres in India).[1]

S Graham M. Schweig: *The Bhakti Sūtras of Nārada*. Journal of Vaiṣṇava Studies, vol. 6, no. 1 (winter 1998), pp. 141–151.

[1]The translation of the sūtras in this edition can be found at:
`http://www.vnn.org/world/WD0103/WD08-6647.html`

1 अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥
2 सा त्वस्मिन् परमप्रेमरूपा[1] ॥ २ ॥
3 अमृतस्वरूपा च ॥ ३ ॥
4 यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति ॥ ४ ॥
5 यत्प्राप्य न किञ्चिद्वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति ॥ ५ ॥
6 यज्ज्ञात्वा मत्तो भवति स्तब्धो भवत्यात्मारामो भवति ॥ ६ ॥
7 सा न कामयमाना निरोधरूपत्वात् ॥ ७ ॥
8 निरोधस्तु लोकवेदव्यापारन्यासः ॥ ८ ॥
9 तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ९ ॥
10 अन्याश्रयाणां त्यागोऽनन्यता ॥ १० ॥
11 लोकवेदेषु[2] तदनुकूलाचरणं तद्विरोधिषूदासीनता ॥ ११ ॥
12 भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ॥ १२ ॥
13 अन्यथा पातित्यशङ्कया[3] ॥ १३ ॥
14 लोकोऽपि[4] तावदेव भोजनादिव्यापारस्त्वाशरीरधारणावधि ॥ १४ ॥
15 तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥ १५ ॥
16 पूजादिष्वनुराग इति पाराशर्यः ॥ १६ ॥
17 कथादिष्विति गर्गः ॥ १७ ॥
18 आत्मरत्यविरोधेनेति शाण्डिल्यः ॥ १८ ॥
19 नारदस्तु तदर्पिताखिलाचारता[5] तद्विस्मरणे परमव्याकुलतेति ॥ १९ ॥
20 अस्त्येवमेवम् ॥ २० ॥
21 यथा व्रजगोपिकानाम् ॥ २१ ॥
22 तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः ॥ २२ ॥
23 तद्विहीनं जाराणामिव ॥ २३ ॥
24 नास्त्येव तस्मिंस्तत्सुखसुखित्वम्[6] ॥ २४ ॥
25 सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥ २५ ॥
26 फलरूपत्वात् ॥ २६ ॥
27 ईश्वरस्याप्यभिमानद्वेषित्वाद्दैन्यप्रियत्वाच्च[7] ॥ २७ ॥
28 तस्या ज्ञानमेव साधनमित्येके ॥ २८ ॥
29 अन्योन्याश्रयत्वमित्यन्ये[8] ॥ २९ ॥
30 स्वयं फलरूपतेति[9] ब्रह्मकुमारः[10] ॥ ३० ॥
31 राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥ ३१ ॥
32 न तेन राजपरितोषः[11] क्षुच्छान्तिर्वा ॥ ३२ ॥

[1] H: परप्रेमरूपा
[2] G: लोके वेदेषु
[3] C and G: पातित्यांशाङ्कया
[4] I: लोकेऽपि
[5] G: °आचारिता
[6] S: तस्मिंस्तत्सुखित्वम्
[7] I and S: °अभिमानि°
[8] I and S: °इत्येके
[9] I: फलरूपेति
[10] C and G: ब्रह्मकुमाराः
[11] H: राजा परितोषः

33 तस्मात् सैव ग्राह्या मुमुक्षुभिः ॥ ३३॥
34 तस्याः साधनानि गायन्त्याचार्याः ॥ ३४॥
35 तत्तु विषयत्यागात् सङ्गत्यागाच्च ॥ ३५॥
36 अव्यावृत्तभजनात्[12] ॥ ३६॥
37 लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥ ३७॥
38 मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद्वा ॥ ३८॥
39 महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥ ३९॥
40 लभ्यतेऽपि तत्कृपयैव ॥ ४०॥
41 तस्मिंस्तज्जने भेदाभावात् ॥ ४१॥
42 तदेव साध्यतां तदेव साध्यताम् ॥ ४२॥
43 दुःसङ्गः सर्वथैव त्याज्यः ॥ ४३॥
44 कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाशसर्वनाशकारणत्वात्[13] ॥ ४४॥
45 तरङ्गायिता[14] अपीमे सङ्गात् समुद्रायन्ते[15] ॥ ४५॥
46 कस्तरति कस्तरति मायां यः सङ्गं त्यजति यो महानुभावं सेवते निर्ममो भवति ॥ ४६॥
47 यो विविक्तस्थानं सेवते यो लोकबन्धमुन्मूलयति निस्त्रैगुण्यो भवति यो योगक्षेमं त्यजति ॥ ४७॥
48 यः कर्मफलं त्यजति[16] कर्माणि सन्न्यस्यति ततो निर्द्वन्द्वो भवति ॥ ४८॥
49 यो वेदानपि सन्न्यस्यति केवलमविच्छिन्नानुरागं लभते ॥ ४९॥
50 स तरति स तरति लोकांस्तारयति ॥ ५०॥
51 अनिर्वचनीयं प्रेमस्वरूपम् ॥ ५१॥
52 मूकास्वादनवत् ॥ ५२॥
53 प्रकाश्यते[17] क्वापि पात्रे ॥ ५३॥
54 गुणरहितं कामनारहितं प्रतिक्षणवर्धमानमविच्छिन्नं सूक्ष्मतरमनुभवरूपम् ॥ ५४॥
55 तत्प्राप्य तदेवावलोकयति तदेव शृनोति तदेव भाषयति[18] तदेव चिन्तयति ॥ ५५॥
56 गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ॥ ५६॥
57 उत्तरस्मादुत्तरस्मात्पूर्वपूर्वा[19] श्रेयाय भवति ॥ ५७॥
58 अन्यस्मात् सौलभ्यं भक्तौ ॥ ५८॥
59 प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात् ॥ ५९॥
60 शान्तिरूपात्परमानन्दरूपाच्च ॥ ६०॥
61 लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात्[20] ॥ ६१ ॥
62 न तत्सिद्धौ लोकव्यवहारो[21] हेयः किन्तु फलत्यागस्तत्साधनं च कार्यमेव[22] ॥ ६२॥

[12] C: अव्यावृत॰
[13] H: कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाशकारणत्वात्
[14] I: तरङ्गिता
[15] C, G, I and S: समुद्रायन्ति
[16] I omits त्यजति
[17] C and H: प्रकाशते
[18] I and S omits तदेव भाषयति
[19] I: ॰पूर्वपुर्वो
[20] C and G: निवेदितात्मलोकवेदशीलत्वात्
[21] I: ॰व्यावहारो
[22] H omits कार्यमेव

63 स्त्रीधननास्तिकचरित्रं[23] न श्रवणीयम् ॥ ६३ ॥
64 अभिमानदम्भादिकं त्याज्यम् ॥ ६४ ॥
65 तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम्[24] ॥ ६५ ॥
66 त्रिरूपभङ्गपूर्वकं नित्यदास्यनित्यकान्ताभजनात्मकं[25] प्रेम कार्यं प्रेमैव कार्यम् ॥ ६६ ॥
67 भक्ता एकान्तिनो मुख्याः ॥ ६७ ॥
68 कण्ठावरोधरोमाञ्चाश्रुभिः[26] परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च ॥ ६८ ॥
69 तीर्थी कुर्वन्ति तीर्थानि सुकर्मी कुर्वन्ति कर्माणि सच्छास्त्री कुर्वन्ति शास्त्राणि ॥ ६९ ॥
70 तन्मयाः ॥ ७० ॥
71 मोदन्ते पितरो[27] नृत्यन्ति देवताः सनाथा चेयं भूर्भवति ॥ ७१ ॥
72 नास्ति तेषु जातिविद्यारूपकुलधनक्रियादिभेदः ॥ ७२ ॥
73 यतस्तदीयाः ॥ ७३ ॥
74 वादो नावलम्ब्यः ॥ ७४ ॥
75 बाहुल्यावकाशत्वादनियतत्वाच्च ॥ ७५ ॥
76 भक्तिशास्त्राणि मननीयानि[28] तदुद्बोधकर्माणि[29] करणीयानि ॥ ७६ ॥
77 सुखदुःखेच्छालाभादित्यक्ते काले[30] प्रतीक्ष्यमाणे[31] क्षणार्धमपि व्यर्थं न नेयम् ॥ ७७ ॥
78 अहिंसासत्यशौचदयास्तिक्यादिचारित्र्याणि परिपालनीयानि ॥ ७८ ॥
79 सर्वदा सर्वभावेन निश्चिन्तैर्भगवानेव[32] भजनीयः ॥ ७९ ॥
80 स कीर्त्यमानः शीघ्रमेवाविर्भवत्यनुभावयति भक्तान् ॥ ८० ॥
81 त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ॥ ८१ ॥
82 गुणमाहात्म्यासक्तिरूपासक्तिपूजासक्तिस्मरणासक्तिदास्यासक्तिसख्यासक्ति-
वात्सल्यासक्तिकान्तासक्त्यआत्मनिवेदनासक्तितन्मयासक्तिपरमविरहासक्ति-
रूपैकधाप्येकादशधा[33] भवति ॥ ८२ ॥
83 इत्येवं[34] वदन्ति जनजल्पनिर्भया एकमताः कुमारव्यासशुकशाण्डिल्यगर्गविष्णु-
कौण्डिल्यशेषोद्धवारुणिबलिहनुमद्विभीषणादयो भक्त्याचार्याः ॥ ८३ ॥
84 य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रद्धते स भक्तिमान् भवति स प्रेष्ठं लभते स प्रेष्ठं लभते इति[35] ॥ ८४ ॥

[23] C and G: स्त्रीधननास्तिकवैरिचरित्रं
[24] C: करणी
[25] C and G: नित्यदास॰
[26] I and S: ॰रोमाश्रुभिः
[27] C: पितरौ
[28] G and S: मनननीयानि
[29] I and S: तद्बोधकर्माणि  G: तद्वर्धककर्माणि
[30] H omits काले
[31] I and S: प्रतीक्षमाणे
[32] C and G: निश्चिन्तितैर्॰
[33] C and H reads तन्मयतासक्ति instead of तन्मयासक्ति
[34] S: इत्येव
[35] H omits इति